स्तुति: । यथा, ऋग्वेदे । २ । २४ । १४ ।
"महीव रीति: शवसासरत् पृथक् ।"
"महीव रीति: महती स्तुतिरिव ।" इति तद्भाष्ये सायण: ।) काव्यस्यात्मा । इति वामनसूत्रम् । गुणभेदेन तद्विभागमाह ।
"ओज:प्रसादमाधुर्य्यगुणत्रितयभेदत: ।
गौड़वैदर्भ्यपाञ्चालरीतय: परिकीर्त्तिता: ॥"
प्रत्येकेनैवां लक्षणानि यथा,—
"ओज: समासभूयस्त्वं मांसलं पदडम्बरम् ।
व्यक्तार्थपदमग्राम्यं प्रसाद: परिकीर्त्तित: ॥
शब्दार्थयोस्तु रसवन्मधुरं परिकीर्त्तितम् ।
सर्व्वलोकावगम्यं यद्ग्राम्यं तदभिधीयते ।
सुश्राव्यमपि गम्भीरं प्रसन्नमुपनागरम् ॥"
ग्राम्यं यथा,—
"कन्ये मय्येऽव्यसौ धन्यो यस्त्वामद्य विवाहयेत् ।
गाङ्गेन तपसा लभ्य: सुन्दरस्त्रीसमागम: ॥"
उपनागरं यथा—
"तन्वि त्वदधरं स्वादु नाविदन्नविदो जना: ।
वसुधायां सुधाभावात्तृष्णा स्वर्गं ययासव: ॥
शब्दालङ्करणं तत् स्याद्यदनुप्रासभास्वरम् ।
वर्णावृत्तिरनुप्रास: पदे पादे विधीयते ।
पदावृत्तिस्तु यमकमादिमध्यान्तसर्व्वगम् ॥" *॥
क्रमेण रीतित्रयाणामुदाहरणानि ।
"गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्ज्जत्फुत्कृतिभीतिसम्भृतिचमत्कारस्फुरत्-सम्भ्रमा ।
आनन्दाश्रुतवापिकां विदधती चित्ते गिरीश-प्रभो-
र्व्वा पायान्नवसङ्गमे भगवती लज्जावती पार्व्वती ॥
भवतीं विरहव्याधिमधिगम्य ससम्भ्रमा ।
कामिनी यामिनीकान्तं कृतान्तमिव पश्यति ॥
कृन्तामि सन्तापमिदन्तयेऽस्या:
किं तालवृन्तं तरलीकरोषि ।
उत्ताप एषोऽन्तरतापहेतु-
र्नतभ्रुवो नयननापनेय: ॥"
इति काव्यचन्द्रिका ।
(अस्या अन्यद्विवरणं साहित्यदर्पणे ९ परिच्छेदे द्रष्टव्यम् ।)

रीतिकं, क्ली, पुष्पाञ्जनम् । इति राजनिर्घण्ट: ॥

रीतिका, स्त्री, कुसुमाञ्जनम् । इति शब्दचन्द्रिका पित्तलञ्च । (यथा, बृहत्संहितायाम् । ५७ । ८ ।
"अष्टौ सीसकभागा: कांसस्य द्वौ तु रीतिका-भाग: ।
मयकथितो योगोऽयं विज्ञेयो वज्रसंघात: ॥")

रीतिपुष्पं, क्ली, ( रीते: पित्तलस्य पुष्पमिव । तदाकृतित्वात् ।) कुसुमाञ्जनम् । इत्यमर: । २ । ९ । १०३ ॥

रीव, ऋ ञ पीवे । इति कविकल्पद्रुम: ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ, अरिरीवत् । ञ, रीवति रीवते । पीवो ग्रहणसंवरणयो: । इति दुर्गादास: ॥

रु, ङ वधे । गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, रवते । इति दुर्गादास: ॥

रु, ल ध्वनौ । इति कविकल्पद्रुम: ॥ ( अदा०-पर०-अक०-सेट् ।) ल, रौति रवीति पक्षी । इति दुर्गादास: ॥

रु:, पुं, शब्द: । इत्येकाक्षरकोष: ॥

रुक:, त्रि, बहुप्रद: । इति शब्दमाला ॥

रुक्, [ च् ] स्त्री, ( रुच्+भावे क्विप् ।) शोभा । ( यथा, माघे । ४ । ६६ ।
"दधद्भिरभितस्तटौ विकचवारिजाम्बूनदै-र्व्विनोदितदिनक्लमा: कृतरुचश्च जाम्बूनदै: ॥")
द्युति: । ( यथा, किराते । ५ । ४५ ।
"क्षिपति योऽनुवनं विततां बृहद्-
बृहतिकामिव रौचनिकीं रुचम् ॥" )
इच्छा । इति मेदिनी ॥ ( यथा, महाभारते । १३ । १२४ । २८ ।
"नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि ।
ग्रहीतुं स्वगुणै: सर्व्वांस्तेनासि हरिव: कृश: ॥"
तेज: । यथा, रघु: । ९ । ६ ।
"अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्रसरं रुचा ॥")
शारिकाशुकवाक् । इति शब्दरत्नावली ॥

रुक्, [ ज् ] स्त्री, ( रुज्+क्विप् ।) रोग: । इत्यमर: । २ । ६ । ५१ ॥ (यथा, भागवते । ६ । १ । ८ ।
"दोषस्य दृष्ट्वा गुरु लाघवं यथा
भिषक् चिकित्सेत रुजां निदानवित् ॥"
रुजति पीड़यतीति । पीड़ादायके, त्रि । यथा, महाभारते । ५ । ८४ । १ ।
"प्रयान्तं देवकीपुत्त्रं परवीररुजो दश ।
महारथा महाबाहुमन्वयु: शस्त्रपाणय: ॥"
अथवा परस्य वीराणां रुक् येभ्य इति ॥ )

रुक्प्रतिक्रिया, स्त्री, ( रुज: प्रतिक्रिया निरसनम् ।) चिकित्सा । इत्यमर: । २ । ६ । ५० ॥

रुक्मं, क्ली, ( रोचते शोभते इति । रुच्+"युजिरुचितिजां कुश्च । उणा० १ । १४५ । इति मक् कवर्गश्चान्तादेश: ।) काञ्चनम् । ( यथा, रामायणे । २ । ७० । २१ ।
"रुक्मनिष्कसहस्रे द्वे षोड़शाश्वशतानि च ।
सत्कृत्य कैकयीपुत्त्रं केकेयो धनमादिशत् ॥")
धुस्तूरम् । इत्यमर: ॥ लोहम् । इति मेदिनी । मे, २८ । ( अस्य पर्य्यायो यथा,—
"कृष्णायसं काललोहं रुक्मं तत्तीक्ष्णमप्यथ ॥"
इति वैद्यकरत्नमालायाम् ॥ )
नागकेशरम् । इति राजनिर्घण्ट: ॥ ( वर्णे, पुं । इति उज्ज्वलदत्त: । १ । १४५ ॥ दीप्तिशीले, त्रि । यथा, ऋग्वेदे । ५ । ६१ । १२ ।
"दिवि रुक्म इवोपरि ॥"
"दिवि द्युलोके रुक्मो रोचमान आदित्य इव ।"
इति तद्भाष्ये सायण: ।)

रुक्मकारक:, पुं, ( रुक्मं स्वर्णालङ्कारं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । तत: स्वार्थे कन् ।) स्वर्णकार: । इत्यमर: । २ । १० । ८ ॥

रुक्माङ्गद:, पुं, राजविशेष: । यथा । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपति-र्द्दिग्विजययात्राप्रसङ्गेनागत्य चन्द्रभागानदी-तीरे समावेशितकटको वर्त्तते । इत्यादि हितोपदेशे १ परिच्छेद: ॥

रुक्मिणी, स्त्री, (रुक्मो वर्णोऽस्त्यस्या इति । रुक्म+इनि: । ङीप् ।) कृष्णमहिषीविशेष: । तत्पर्य्याय: । ई: २ रमा ३ सिन्धुजा ४ भामा ५ चला ६ हीरा ७ चपला ८ वृषाकपायी ९ चपला १० इन्दिरा ११ लक्ष्मी: १२ पद्मालया १३ पद्मा १४ कमला १५ श्री: १६ हरिप्रिया १७ । इति जटाधर: ॥ अस्या विवरणं यथा,
"विदर्भराजो धर्म्मात्मा भीष्मको नाम धार्म्मिक: ।
बभूवुस्तस्य पुत्त्रास्तु नाम्ना रुक्म्यादय: शुभा: ॥
तेषामवरजा कन्या रुक्मिणी रुक्मवर्णिनी ।
कमलांशेन सम्भूता सर्व्वलक्षणशोभिता ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति ॥"
इति पाद्मोत्तरखण्डे ९७ अध्याय: ॥*॥
( रुक्मिण्या सह शिशुपालस्य विवाहघोषणा श्रीकृष्णस्य रुक्मिणीहरणं कृतायाश्च तस्यां यादवै: सह राज्ञां तुमुलयुद्धादिकं हरिवंशे । ११६ अध्याये द्रष्टव्यम् ॥*॥ नारदस्य रुक्मिण्यै पारिजातपुष्पप्रदानवृत्तान्तं तत्रैव च १२२ अध्याये द्रष्टव्यम् ॥*॥ अस्या: सन्ततिनामानि यथा तत्रैव । १६० । ४—६ ।
"——————रुक्मिणीतनयान् शृणु ।
प्रद्युम्न: प्रथमं यज्ञे शम्बरान्तकर: सुत: ॥
द्वितीयश्चारुदेष्णश्च वृष्णिसिंहो महारथ: ।
चारुभद्रश्चारुगर्भ: सुदंष्ट्रो द्रुम एव च ॥
सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।
चारुबाहु: कनीयांश्च कन्या चारुमती तथा ॥")
स्वर्णक्षीरी । इति राजनिर्घण्ट: ॥

रुक्मिणीव्रतं, क्ली, ( रुक्मिण्या व्रतम् ।) व्रतविशेष: । यथा,—
सूत उवाच ।
"जामदग्न्य: समाकर्ण्य रमां तां पुत्त्रमङ्गिनीम् ।
कल्किरभिमतं बुद्धा कारयद्रुक्मिणीव्रतम् ॥
व्रतेन तेन च रमा पुत्राढ्या सुभगा सती ।
सर्व्वभोगेन संयुक्ता बभूव स्थिरयौवना ॥
शौनक उवाच ।
विधानं ब्रूहि मे सूत व्रतस्यास्य च यत् फलम् ।
पुरा केन कृतं धर्म्म्यं रुक्मिणीव्रतमुत्तमम् ॥
सूत उवाच ।
शृणु ब्रह्मन् ! राजपुत्त्री शर्म्मिष्ठा वार्षपर्व्वणी ।
अवगाह्य सरोनीरं सोमं हरमपश्यत ।
सा सखीभि: परिवृता देवयान्या च संगता ।
शम्भुभीत्या समुत्थाय पर्य्यधुर्वसनं द्रुतम् ।
तत्र शुक्रस्य कन्या या वस्त्रव्यत्ययमाकुला ।
संवस्त्र कुपिता प्राह वसनं त्यज भिक्षुकि ! ॥